# शास्त्रिप्रथमवर्षम्
## षष्ठपत्रम् नव्यन्यायः
## शैक्षिकनिष्पत्तिः

**ग्रन्थः – न्यायसिद्धान्तमुक्तावली (अनुमानखण्डात् आन्तम्)**

**पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-**

- ❖ अनुमानप्रमाणम्, अनुमित्युत्पत्तिप्रक्रियां, परामर्शस्वरूपं, सदलकृत्यम्, अव्यभिचाररूपव्याप्तिलक्षणं, तत्परित्यागबीजं, व्यापकसामानाधिकरण्यरूपव्याप्तिलक्षणं, तत्र दलसार्थक्यं, तन्निष्कर्षं, पक्षतास्वरूपं चावगच्छेयुः।
- ❖ हेत्वाभाससामान्यलक्षणं, सदलकृत्यं तन्निष्कर्षं, पञ्चविधहेत्वाभासदोषान् चाधिगच्छेयुः।
- ❖ उपमानप्रमाणं, शब्दप्रमाणं, शक्तिं, तद्ग्रहोपायान्, पदस्य जातिविशिष्टव्यक्तिवाचकत्वं, पदचातुर्विध्यं, लक्षणास्वरूपम्, आसत्तियोग्यताकांक्षातात्पर्यज्ञानानां शाब्दबोधहेतुत्वञ्च विजानीयुः।
- ❖ स्मरणानुभवयोः कार्यकारणभावं, मनोऽणुत्ववादं, गुणत्वजातिसिद्धिं, मूर्तामूर्तोभयसमवेतान्, एकैकद्रव्याश्रितान् अनेकद्रव्याश्रितान् सामान्य-विशेषभेदभिन्नान् एकैकेन्द्रियग्राह्यान् अनेकेन्द्रियग्राह्यान् अकारणगुणोत्पन्नान् कारणगुणोत्पन्नान् कर्मजान् अव्याप्यवृत्तींश्च गुणान् ज्ञातुं शक्नुयुः।
- ❖ रूपादिचतुष्टयस्य लक्षणस्वरूपविभागान्, तत्र चित्ररूपस्यावश्यकतां, पीलुपाकवादं, पिठरपाकवादं, संख्या-परिमाण-पृथक्त्व-संयोगविभागादिगुणानां लक्षणस्वरूपविभागांश्च ज्ञातुं समर्था भवेयुः।

- ❖ भ्रमप्रमानिश्चयसंशयानां लक्षणस्वरूपे, भ्रमजनकदोषान्, प्रमाजनकगुणान्, प्रामाण्यस्य परतो ग्राह्यत्वम्, अन्यथाख्यातिसाधकयुक्तिं तल्लक्षणं चाधिगन्तुं शक्नुयुः।
- ❖ व्याप्तिग्रहोपायं, व्यभिचारशङ्कानिवर्तकतर्कं, व्यभिचारोद्भावकोपाधिं शब्दोपमानयोः पृथक्प्रामाण्यम् अनुमानत्रैविध्यं चाधिगच्छेयुः।
- ❖ व्यतिरेकव्याप्तिस्वरूपम्, अर्थापत्तेः क्लृप्तप्रमाणेष्वन्तर्भावम्, इच्छा-चिकीर्षा-द्वेष-प्रयत्नगुणानां स्वरूपं तद्भेदांश्च विजानीयुः।

- ❖ मतभेदेन विध्यर्थं, प्रवृत्ति-निवृत्तिकारणं, गुरुत्व-द्रवत्व-स्नेहगुणानां स्वरूपं, संस्कारभेदान्, तेषां स्मरणादिहेतुत्वं, धर्माधर्मयोः स्वर्गादिसाधनत्वं, शब्दस्य विभागम् अनित्यत्वं च ज्ञातुं शक्नुयुः।